दशमः पाठः

# प्रतीक्षा

आधुनिक उड़िया लेखकों में श्री रमाकान्त रथ का मूर्धन्य स्थान है। आप की अनेक कविताएँ देश-विदेश की भाषाओं में अनूदित हो चुकी हैं। संस्कृत भाषा में इनकी कविताओं का अनुवाद "श्रीराधा" के रूप में प्रकाशित हुआ है। इसके अनुवादक श्री गोविन्द चन्द्र उद्गाता हैं। गीतगोविन्द की भाँति इस में भी राधा एवं कृष्ण के सख्यभाव को रहस्यवाद की छाया में बहुत सुन्दर प्रकार से वर्णित किया गया है। राधा कृष्ण की प्रतीक्षा करती है और अत्यन्त व्याकुल हो जाती है। दिन-रात प्रतीक्षा में उसे विभिन्न रूपों की जो छवि दिखाई देती है, वह वस्तुतः अनिर्वचनीय है। उन के रूप का साकल्येन वर्णन करना असम्भव ही है। कण-कण में विद्यमान वह उपास्य, भक्त को विभिन्न रूपों में दिखाई देता है - यह तथ्य बड़े ही प्रतीकात्मक प्रकार से इस गीत में प्रतिपादित किया गया है।



प्रतीक्षेऽहं तव कृते दिनं दिनम्
रजनीं रजनीं च
न जातु दर्शनं ददासि मे,
किं तावन्मे सा प्रतीक्षा?
तस्यां मे चांचल्यपरिपूरितायां प्रतीक्षायाम्
कुत्र वा विद्यते स्थानम्
अवस्थानाय तव पूर्णतया?

यदा वा दृश्यते,
रूपस्यार्धाधिकं तदा तव
लोचनविषयातीतं भूत्वा तिष्ठति।
यत् किंचिदपि दृश्यते
तथापि न भजति स्पष्टरूपताम्
यतस्तत् समाच्छन्नमेव भवति
अशान्ति-प्रसूतैर्मे
स्मृति-दृश्याभिलाषैर्बहुविधैः,

अथ वा दृश्यते स्फुरज्जलवक्षसि
छायेव पादपानामुपकूलवर्तिनाम्।
दृष्टे सति कस्यचिन्नाम्नो रूपे
स्थाने तस्योपजायमानं दृश्यते
अन्यच्चन किंचन रूपं नामान्तर-चिह्नितम्।
एकमेव रुपं भूत्वा।

हन्त नाहं भाजनमभवमेतावताऽपि कालेन
एकमेव रूपं कर्तुमात्मनः पूर्णतया।

कियान् पुनः कालो वर्तते शेषः
यदहं चिन्तयिष्यामि
यदसि त्वं तद्रूपतयाऽऽगत्य
एकदा समुपस्थास्यसि मदन्तिके
निर्जनवेलायां मे परमायुषः?

## शब्दार्थाः टिपण्यश्च

| | | |
|---|---|---|
| **प्रतीक्षे** | – | प्रतीक्षा करती हूँ। |
| **रजनीम्** | – | रात्रिम्, रजनी, द्वि.वि.ए.व., रात को। |
| **जातु** | – | अव्ययम्, कभी भी। |
| **ददासि** | – | यच्छसि, दा, लट्, म.पु.एक व., देते हो। |
| **प्रतीक्षायाम्** | – | प्रतीक्षा शब्द, सप्तमी वि. ए. व. (स्त्री.), प्रतीक्षा में। |
| **विद्यते** | – | है (विद्यमान है)। |
| **अवस्थानाय** | – | अव + स्था + ल्युट् (अन), चतु. वि.एक.व., ठहरने के लिए। |
| **समाच्छन्नम्** | – | सम् + आ + छद् + क्त, ढका हुआ। |
| **प्रसूतैः** | – | प्र + सू + क्त, तृ.वि.बहु व., उत्पन्नों से। |
| **अन्तिके** | – | समीपे, समीप। |
| **वेलायाम्** | – | वेला, स.वि.ए.व., (स्त्री.), समय में। |

## अभ्यासः

1. **एकपदेन उत्तरत–**

(क) का प्रतीक्षां करोति?

(ख) प्रतीक्षा कीदृशी अस्ति?

(ग) कः दर्शनं न ददाति?

(घ) 'प्रतीक्षा' पाठः कस्मात् ग्रन्थात् अनूदितः?

2. **पूर्णवाक्येन उत्तरत–**

(क) अहं कथं प्रतीक्षे?

(ख) राधा पूर्णतया आत्मनः किं कर्तुं वाञ्छति?

(ग) एकदा कुत्र समुपस्थास्यसि?

(घ) एकमेव रूपं भूत्वा कथं चिह्नितम्?

(ङ) छायेव सः कुत्र दृश्यते?

(च) यदा वा दृश्यते तदा कथं भूत्वा तिष्ठति?

**3. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) तथापि न भजति स्पष्टरूपताम्।

(ख) अथवा दृश्यते स्फुरज्जलवक्षसि।

(ग) स्थाने तस्य उपजायमानं दृश्यते।

(घ) निर्जनवेलायां मदन्तिके समुपस्थास्यसि।

(ङ) पुनः कालो वर्तते शेषः।

**4. विशेषण-विशेष्यपदानां समुचितं मेलनं कुरुत-**

| | |
|---|---|
| चाञ्चलपूरितायाम् | कालः |
| उपकूलवर्तिनाम् | रूपम् |
| नामान्तरचिह्नितम् | दृश्याभिलाषैः |
| शेषः | प्रतीक्षायाम् |
| बहुविधैः | पादपानाम् |

**5. अधोलिखितेषु सन्धिच्छेदं कुरुत-**

अर्धाधिकम्, छायेव, तस्योपजायमानम्, अन्यच्चन, कस्यचिन्नाम्नः, तद्रूपतया, प्रतीक्षेऽहम्, तावन्मे।

**6. अधोलिखितानां पदानां वाक्येषु प्रयोगं कुरुत-**

भूत्वा, स्थाने, दृश्यते, विद्यते, प्रतीक्षा, दर्शनम्, अन्तिके।

**7. अधोलिखितानां पदपरिचयो देयः।**

ददासि, भूत्वा, दृष्टे, वक्षसि, आयुषः, आत्मनः, कर्तुम्, समाच्छन्नम्।

# योग्यताविस्तारः

'पाठ का उड़िया मूल' श्री रमाकान्त रथ प्रणीत 'श्री राधा' पुस्तक से उद्धृत।

मुँ तमकु दिन दिन राति राति चहिँ रहे किन्तु
तमे जमा देखा दिअ नाहिँ।
मो चाहिँ रहिबा कण? नाना चंचलता
पूर्ण चाहिँ रहिबारे तमे पुरापूरि
रहिबाकु एते जागा काहिँ?
जेतेबेलेबा दिशुछ तम चेहेरार
अर्धाधिक रहे दृष्टि बहिर्भुत होइ,
याहा दिशे ताहा बि मो अशान्तिप्रसूत
नाना दृश्य नाना स्मृति नाना आकांक्षारे
आच्छादित होइ स्पष्ट देखायाए नाहिँ,

बा दिशुछि हलचल पाणिरे येपरि
कूले थिबा गछंकर छाइ।
गोटिए नाआँर रूप दिशिबा मात्र के
अन्य एक नाआँ थिबा अन्य रूपटिए
से जागारे दिशे एकमात्र रूप होइ।
गोटिए रूपरकु मध्य आपणार करिबा भाजन
एतेकाल धरि हेलि नाहिँ।

आउ केते काल बाकी अछि ये भाबिबि
तमे याहा सेपरि भाबरे
दिने आसि पहँचिब मो परमायुर
आउ केहि नथिबा बेलरे?